# Vedamantramanjari 3

# વેદમન્ત્રમઞ્જરિ - ૩

## Document Information

Text title : veda mantra manjari - 3

File name : vedamantramanjari3.itx

Category : sUkta, veda, svara

Location : doc_veda

Transliterated by : Rekha Venkatesh

Proofread by : Rekha Venkatesh

Latest update : December 29, 2014

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 31, 2020

*sanskritdocuments.org*

# વેદમન્ત્રમઞ્જરિ - 3

## ॥ શ્રીગણેશસૂક્તમ્ ॥

ઋગ્વેદસંહિતા મણ્ડલ-૮, અષ્ટક-૬, સૂક્ત-૮૧

ૐ આ તૂ ન ઇન્દ્ર ક્ષુમન્તં ચિત્રં ગ્રાભં સં ગૃભાય । મહાહસ્તી
દક્ષિણેન ॥ ૧ ॥ વિદ્મા હિ ત્વા તુવિકૂર્મિન્તુવિદેષ્ણં તુવીમઘમ્ ।
તુવિમાત્રમવોભિઃ ॥ ૨ ॥ ન હિ ત્વા શૂર દેવા ન મર્તાસો દિત્સન્તમ્ ।
ભીમં ન ગાં વારયન્તે ॥ ૩ ॥ એતોન્વિન્દ્રં સ્તવામેશાનં વસ્વઃ સ્વરાજમ્ ।
ન રાધસા મર્ધિષન્નઃ ॥ ૪ ॥ પ્ર સ્તોષદુપ ગાસિષચ્છ્રવત્સામ ગીયમાનમ્ ।
અભિરાધસાજુગુરત્ ॥ ૫ ॥ આ નો ભર દક્ષિણેનાભિ સવ્યેન પ્ર મૃશ । ઇન્દ્ર
માનો વસોર્નિર્ભાક્ ॥ ૬ ॥ ઉપક્રમસ્વા ભર ધૃષતા ધૃષ્ણો જનાનામ્ ।
અદાશૂષ્ટરસ્ય વેદઃ ॥ ૭ ॥ ઇન્દ્ર ય ઉ નુ તે અસ્તિ વાજો વિપ્રેભિઃ સનિત્વઃ ।
અસ્માભિઃ સુતં સનુહિ ॥ ૮ ॥ સદ્યોજુવસ્તે વાજા અસ્મભ્યમ્ વિશ્વશ્ચન્દ્રાઃ
। વશૈશ્ચ મક્ષૂ જરન્તે ॥ ૯ ॥ ગણાનાં ત્વા ગણપતિં હવામહે કવિં
કવીનામુપમશ્રવસ્તમમ્ । જ્યેષ્ઠરાજં બ્રહ્મણાં બ્રહ્મણસ્પત આ
નઃ શ઼ૃણ્વન્નૂતિભિસ્સીદ સાદનમ્ ॥ ૧૦ ॥ નિ ષુ સીદ ગણપતે ગણેષુ
ત્વામાહુર્વિપ્રતમં કવીનામ્ । ન ઋતે ત્વત્ક્રિયતે કિં ચનારે મહામર્કં
મઘવચ્ચિત્રમર્ચ ॥ ૧૧ ॥ અભિખ્યાનો મઘવન્નાધમાનાન્ત્સખે બોધિ
વસુપતે સખીનામ્ । રણં કૃધિ રણકૃત્સત્યશુષ્માભક્તે ચિદા ભજા રાયે
અસ્માન્ ॥ ૧૨ ॥

॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

## ॥ ઐકમત્ય સૂક્તમ્ ॥

ઋષિઃ સંવનનઃ આઙ્ગિરસઃ

છન્દઃ અનુષ્ટુપ્ ૧,૨,૪ ત્રિષ્ટુપ્ ૩

દેવતા અગ્નિઃ ૧, સઞ્જ્ઞાનમ્ ૨-૪

ૐ સંસમિદ્યુવસે વૃષન્નગ્ને વિશ્વાન્યર્ય આ । ઇળસ્પદે સમિધ્યસે સ નો
વસૂન્યા ભર ॥ ૧ ॥

સં ગચ્છધ્વં સં વદધ્વં સં વો મનાંસિ જાનતામ્ । દેવા ભાગં યથા
પૂર્વે સઞ્જાનાના ઉપાસતે ॥ ૨ ॥

સમાનો મન્ત્રઃ સમિતિઃ સમાની સમાનં મનઃ સહ ચિત્તમેષામ્ ।
સમાનં મન્ત્રમભિ મન્ત્રયે વઃ સમાનેન વો હવિષા જુહોમિ ॥ ૩ ॥

સમાની વ આકૂતિઃ સમાના હૃદયાનિ વઃ । સમાનમસ્તુ વો મનો યથા
વઃ સુસહાસતિ ॥ ૪ ॥

॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

## ॥ શ્રદ્ધા સૂક્તમ્ ॥

ઋષિઃ શ્રદ્ધા કામાયની

છન્દઃ અનુષ્ટુપ્

દેવતા શ્રદ્ધા દેવી

ૐ શ્રદ્ધયાગ્નિસ્સમિધ્યતે । શ્રદ્ધયા વિન્દતે હવિઃ । શ્રદ્ધાં ભગસ્ય
મૂર્ધનિ । વચસા વેદયામસિ । પ્રિયગ્ગ્ં શ્રદ્ધે દદતઃ । પ્રિયગ્ગ્ં શ્રદ્ધે
દિદાસતઃ । પ્રિયં ભોજેષુ યજ્વસુ । ઇદં મ ઉદિતં કૃધિ । યથા
દેવા અસુરેષુ । શ્રદ્ધામુગ્રેષુ ચક્રિરે । એવં ભોજેષુ યજ્વસુ ।
અસ્માકમુદિતં કૃધિ । શ્રદ્ધાં દેવા યજમાનાઃ । વાયુગોપા ઉપાસતે
। શ્રદ્ધાગ્ં હૃદય્યયાઽકૂત્યા । શ્રદ્ધયા હૂયતે હવિઃ । શ્રદ્ધાં
પ્રાતર્હવામહે । શ્રદ્ધાં મધ્યન્દિનં પરિ । શ્રદ્ધાગ્ં સૂર્યસ્ય નિમ્રુચિ

। શ્રદ્ધે શ્રદ્ધાપયે હમા । શ્રદ્ધા દેવાનધિવસ્તે । શ્રદ્ધા વિશ્વમિદં
જગત્ । શ્રદ્ધાં કામસ્ય માતરમ્ । હવિષા વર્ધયામસિ ॥

॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

## ॥ સ્વસ્તિનોમિમીતાં સૂક્તમ્ ॥

ઋગ્વેદ સંહિતાઃ મણ્ડલ-૫, અષ્ટક-૪, સૂક્ત-૫૧

ઋષિઃ સ્વસ્ત્યાત્રેય

છન્દઃ ત્રિષ્ટુપ્ ૧,૨,૩ અનુષ્ટુપ્ ૪,૫

દેવતા વિશ્વેદેવતાઃ

ૐ સ્વસ્તિ નો મિમીતામશ્વિના ભગઃ સ્વસ્તિ દેવ્યદિતિરનર્વણઃ । સ્વસ્તિ પૂષા અસુરો દધાતુ નઃ સ્વસ્તિ ધાવાપૃથિવી સુચેતુના ॥ ૧ ॥ સ્વસ્તયે વાયુમુપ બ્રવામહૈ સોમં સ્વસ્તિ ભુવનસ્ય યસ્પતિઃ । બૃહસ્પતિં સર્વગણં સ્વસ્તયે સ્વસ્તય આદિત્યાસો ભવન્તુ નઃ ॥ ૨ ॥ વિશ્વે દેવા નો અદ્યા સ્વસ્તયે વૈશ્વાનરો વસુરગ્નિઃ સ્વસ્તયે । દેવા અવન્ત્વૃભવઃ સ્વસ્તયે સ્વસ્તિ નો રુદ્રઃ પાત્વંહસઃ ॥ ૩ ॥ સ્વસ્તિ મિત્રાવરુણા સ્વસ્તિ પથ્યે રેવતિ । સ્વસ્તિ ન ઇન્દ્રશ્ચાગ્નિશ્ચ સ્વસ્તિ નો અદિતે કૃધિ ॥ ૪ ॥
સ્વસ્તિ પન્થામનુ ચરેમ સૂર્યાચન્દ્રમસાવિવ । પુનર્દદતાઘ્નતા જાનતા સઙ્ગમેમહિ ॥ ૫ ॥

॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

## ॥ વૈદિક રાષ્ટ્રગીતા ॥

ૐ આબ્રહ્મન્ બ્રાહ્મણો બ્રહ્મવર્ચસી જાયતામાસ્મિન્રાષ્ટ્રે રાજન્ય
ઇષવ્યઃ શૂરો મહારથો જાયતાં દોગ્ધ્રી ધેનુર્વોઢાઽનડ્વાનાશુઃ સપ્તિઃ
પુરન્ધિર્યોષા જિષ્ણૂ રથેષ્ઠાઃ સભેયો યુવાઽસ્ય યજમાનસ્ય વીરો જાયતાં
નિકામે નિકામે નઃ પર્જન્યો વર્ષતુ ફલિન્યો ન ઓષધયઃ પચ્યન્તાં યોગક્ષેમો
નઃ કલ્પતામ્ ॥ તૈત્તિરીય સંહિતા ૭।૫।૧૮ ॥

॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

## ॥ ચતુર્ વેદમન્ત્રાણિ ॥

ૐ અગ્નિમીળે પુરોહિતં યજ્ઞસ્ય દેવમૃત્વિજમ્ । હોતારં રત્નધાતમમ્ ॥

ઇષે ત્વોર્જેત્વા વાયવસ્થો પાયવસ્થ દેવો વસ્સવિતા પ્રાર્પયતુ
શ્રેષ્ઠતમાય કર્મણ આપ્યાયધ્વમઘ્નિયા દેવભાગમૂર્જસ્વતીઃ પયસ્વતીઃ
પ્રજાવતીરનમીવા અયક્ષ્મામાવસ્તેન ઈશત માઽઘશગ્ં સો રુદ્રસ્ય
હેતિઃ પરિવો વૃણક્તુ ધ્રુવા અસ્મિન્ગોપતૌ સ્યાત બહ્વીર્યજમાનસ્ય પશૂન્પાહિ ॥

અગ્ન આયાહિ વીતયે ગૃણાનો હવ્યદાતયે । નિ હોતા સત્સિ બર્હિષિ ॥

શં નો દેવીરભિષ્ટય આપો ભવન્તુ પીતયે । શં યોરભિસ્રવન્તુ નઃ ॥

॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

## ॥ વાક્સૂક્તમ્ ॥

ૐ દેવીં વાચમજનયન્ત દેવાઃ । તાં વિશ્વરૂપાઃ પશવો વદન્તિ ।
સા નો મન્દ્રેષમૂર્જં દુહાના । ધેનુર્વાગસ્માનુપસુષ્ટુતૈતુ ।
યદ્વાગ્વદન્ત્યવિચેતનાનિ । રાષ્ટ્રીદેવાનાં નિષસાદમન્દ્રા । ચતસ્ર
ઊર્જં દુદુહે પયાગ્ંસી । ક્વસ્વિદસ્યાઃ પરમં જગામ । અનન્તામન્તાદધિ
નિર્મિતાં મહીમ્ । યસ્યાં દેવા અદધુર્ભોજનાનિ । એકાક્ષરાં દ્વિપદાગ્ં
ષટ્પદાં ચ । વાચં દેવા ઉપજીવન્તિ વિશ્વે । વાચં દેવા ઉપજીવન્તિ વિશ્વે
। વાચં ગન્ધર્વાઃ પશવો મનુષ્યાઃ । વાચી મા વિશ્વા ભુવનાન્યર્પિતા ।
સા નો હવં જુષતામિન્દ્રપત્ની । વાગક્ષરં પ્રથમજા ઋતસ્ય । વેદાનાં
માતાઽમૃતસ્ય નાભિઃ । સા નો જુષાણોપ યજ્ઞમાગાત્ । અવન્તી દેવી સુહવા
મે અસ્તુ । યા મૃષયો મન્ત્રકૃતો મનીષિણઃ । અન્વૈચ્છન્દેવાસ્તપસા
શ્રમેણ । તાં દેવીં વાચગ્ં હવિષા યજામહે । સા નો દધાતુ સુકૃતસ્ય
લોકે । ચત્વારિવાક્પરિમિતા પદાનિ । તાનિ વિદુર્બ્રાહ્મણા યે મનીષિણઃ ।
ગુહા ત્રીણિ નિહિતા નેઙ્ગયન્તિ । તુરીયં વાચો મનુષ્યા વદન્તિ ॥

॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

Encoded and proofread by Rekha Venkatesh

*Vedamantramanjari 3*

pdf was typeset on August 31, 2020

Please send corrections to *sanskrit@cheerful.com*